# न्यायदृष्ट्या शब्दशक्तिविचारः

**DR. ANIL KUMAR,**
Associate Professor,
Department of Sanskrit, Sree Sankara College, Kalady

पुरुषार्थसाधनोपदेशस्वभावपराः भारतीयशास्त्रशाखाः शास्त्रपूर्वके धर्मप्रयोगे अत्यन्तमुन्मुखाः भवन्ति। शब्दस्य सम्यग्ज्ञानेन प्रयोगेण ऐहिकामुष्मिकाभ्यां अभ्युदयनिःश्रेयसलब्धिः। अत एव भाष्यकारेण पतञ्जलिना उक्तम् - "एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति"[१] इति। शब्दव्यापारविषये भारतीयसिद्धान्तेषु मध्ये विभिन्नाः वादाः विद्यन्ते। नैय्यायिकानां शब्दशक्तिविषये कोऽभिप्रायः इत्यत्र विचार्यते।

## प्रमाणानि

प्रमाकरणं प्रमाणम्। यथार्थानुभवः प्रमा। तत्करणं प्रमाणम्। प्रमाणद्वारा प्रमेयसिद्धिः। प्रमेयसिद्ध्यर्थं नैयायिकाः प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणानि स्वीकुर्वन्ति।

नैय्यायिकः शक्तिमान् शब्द एव पदमित्यभिधीयते। यस्मिन् शब्दे अर्थविशेषद्योतनाय या शक्तिर्भवति स शब्दः पदम् भवति। स च पदः जात्याकृतिविशिष्टं व्यक्तिं बोधयति। उक्तञ्च न्यायसूत्रे 'शक्तिग्रहोपायाः व्यक्त्याकृतिजातयस्तु पदार्थः'[२] इति। ते शब्दस्य शक्तिद्वयं स्वीकुर्वन्ति। अभिधाशक्तिः लक्षणाशक्तिश्च। शब्दस्य यो मुख्यार्थो भवति सा अभिधा शक्तिः। यया वृत्त्या मुख्यार्थबोधः मुख्यार्थसम्बन्धः मुख्यार्थव्यतिरिक्तश्चार्थो ज्ञायते सा लक्षणा शक्तिश्च। मुख्यार्थशक्तिज्ञानसाधनानां शक्तिग्रहोपायानां निर्देशः न्यायसिद्धान्तमुक्तावल्यां अभिहितं वर्तते। यथा -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।
वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।[३]

अस्मिन् श्लोके शब्दार्थग्रहणार्थं अष्टप्रमाणानि निर्धारितानि। तानि व्याकरणं, उपमानं, कोशः, आप्तवाक्यं, व्यवहारः, वाक्यशेषः, विवृतिः सिद्धपदसान्निध्यञ्च।

यद्यपि प्रत्यक्षादिचतुःप्रमाणानि नैय्यायिकैः स्वीकृतानि, तदतिरिक्ततया शब्दार्थग्रहणे अष्टप्रमाणान्यपि गृह्यन्ते चेत् तत्र सिद्धान्तस्य विरोधो भवेत् इति आशङ्का। तत्र सिद्धान्तिना समाधीयते। उक्तानां अष्टप्रमाणानां पूर्वोक्तप्रत्यक्षादि चतुर्षु प्रमाणेष्वन्तर्भावात् न विरोधित्वम्। यथा व्याकरणस्य, कोशस्य, वाक्यशेषस्य, विवृतेः, व्यवहारस्य च प्रत्यक्षे अन्तर्भावः। क्वचित् व्यवहारस्य, सिद्धपदसान्निध्यस्य च अनुमाने अन्तर्भावः। आप्तवाक्यस्य शब्दे अन्तर्भावः। तेषामष्टानां शक्तिग्रहोपायानां प्रामाण्यमत्र विचार्यते।

## १. व्याकरणात्

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहः व्याकरणात् भवति। भू सत्तायां वर्तमाने लडिति व्याकरणात् सत्ताद्यर्थे शब्दबोधः। व्याकरणं तावत् इन्द्रादिप्रणीतं शब्दशास्त्रम्। तस्मात् आप्तवाक्यादपि व्याकरणस्य प्रामाण्यं युक्तम्। आप्तवाक्यस्य शब्दत्वेन प्रमाणेतरसंगृहीतत्वात् व्याकरणस्य आप्तोक्त्या प्रामाण्यमयुक्तमित्याशङ्का। तत्रैव व्याकरणप्रमाणस्य वैशिष्ट्यं वरीवर्त्ति। धातुप्रत्ययप्रातिपदिकानां शक्तिग्राहकतया व्याकरणं विशेषतः उपयुज्यते। आप्तवाक्यानां न तादृशशक्तिविशेषग्रहसामर्थ्यम्।

न्यायसिद्धान्तमुक्तावल्यामेवमुक्तम् - "धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणात् भवति"[४] इति। आदि इत्यनेन समासे शक्तिग्रहः स्वीक्रियते। वैय्याकरणाः समासेऽपि शक्तिं स्वीकुर्वन्ति। यथा चोक्तम् -

"समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्"[५] इति।

वैय्याकरणाः तिङानां शक्तिः कर्तरि स्वीकुर्वन्ति। यथा चैत्रः पचतीत्यत्र पाकक्रियायाः शक्तिः कर्तरि चैत्रे अभेदेनान्वेति। चैत्राभिन्नः पाककर्ता इत्यर्थबोधः तत्र।

## २. उपमानात्

शक्तिग्रहोपायं भवति उपमानमिति नैय्यायिकाः। उपमानस्वरूपं मुक्तावल्यामेवमुक्तम् -

"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।

सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्।।

वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।

गवयादिपदानान्तु शक्तिधीरुपमाफलम्।।"[६]

सादृश्यज्ञानकरणं भवति उपमानम्। सादृश्यप्रत्यक्षस्य अनन्तरं एव उपमितिः इत्यतः सादृश्यप्रत्यक्षस्यैव उपमितिकरणत्वं भवति।

उपमानस्य शक्तिग्रहोपायत्वे न्यायसूत्रमपि वर्तते - "प्रसिद्धसाधर्म्यात् साध्यसाधनम् उपमानम्"[७] इति। प्रसिद्धानां गवादेः सादृश्यज्ञानात् गोसदृशो गवय इति वाक्यात् गवयादिपदवाच्यत्वसिद्धिः उपमितिः, तत्करणमुपमानं च। उपमानस्य संज्ञासंज्ञिसंबन्धोपपादकतया शक्तिग्राहकत्वं सिद्ध्यति।

उपमानस्य शक्तिग्राहकत्वे मिश्राणां मतमीदृशं इति पदशक्तौ उमाकान्तभट्टः -

"गोसदृशो भवति गवयः इति वाक्यश्रवणं अज्ञातगवयपदशक्तित्वेन, ततः गवयदर्शनं, गवये गोसदृशप्रत्यक्षं च जायते। तेन प्रत्यक्षेण गोसदृशो गवय इत्यतिदेशवाक्यार्थस्मरणं जायते। तदेव व्यापारः। व्यापारेण उपमितिरुत्पद्यते। एवं समाख्यासम्बन्धप्रतिपत्तिजनकत्वात् उपमानं शक्तिग्राहकं भवति।"[८]

## ३. कोशात्

अमरकोशनिघण्ट्वादि कोशशब्देन गृह्यते। प्रपञ्चे विद्यमानानां शब्दानां तदर्थानां च संग्रहणं कोशे संभृतमस्ति। ये ये शब्दाः यस्मिन्नर्थे प्रयुक्ताः इत्यवगन्तुं कोशमुपकरोति। यथा नीलादिपदानां नीलरूपादौ नीलवर्णविशिष्टे च शक्तिः कोशेन व्युत्पादिता भवति।

"यमानिलेन्दुचन्द्रार्कविष्णुसिंहांशुवाजिषु

शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु।।"[९]

इत्यत्र हरिशब्दस्य कोऽर्थः संगृहीतव्य इत्याकांक्षायां हरिशब्दस्य बह्वर्थत्वात् कस्मिन्नर्थे ग्रन्थे प्रयोग इत्यवधारणार्थं कोशमावश्यकं भवति।

"अग्निर्वैश्वानरो वह्निः वीतिहोत्रो धनञ्जयः"[१०] इत्यत्र अग्न्यादीनां शब्दानां देवतादिरूपशक्तिबोधः कोशात् भवति। अर्थात् अनेकार्थबोधकानां शब्दानां शक्तिग्रहः कोशादुपजायते।

## ४. आप्तवाक्यात्

न्यायसूत्रे "आप्तोपदेशः शब्दः"[११] इति शब्दप्रमाणलक्षणं कथितम्। तत्र आप्तशब्दस्यार्थः एवं विवृणुते - "आप्तः खलु साक्षात्कृतधर्मा। यथा दृष्टस्यार्थस्य व्याचिख्यापयिषया प्रयुक्तः

उपदेष्टा साक्षात्करणमर्थसमाप्तिः तथा प्रवर्तते इत्याप्तः। ऋष्यर्थम्लेच्छानां समानं लक्षणम्"[१२] इति। "आप्तस्तु यथार्थवक्ता"[१३] इत्यन्नंभट्टः। प्रयोगहेतुभूतयथार्थज्ञानवानाप्तः इति कोशे। गुरोरुच्चारणेन अयं एतत्पदवाच्यः इति शिष्यस्य शक्तिग्रहोपलब्धिः। गुरोरानुपूर्विकात् वाक्यादेव तादृशार्थबोधः। "यथा कोकिलः पिकपदवाच्य इत्यादि शब्दात् पिकादेः पदशक्तिग्रह"[१४] इति मुक्तावल्याम्।

व्यवहारनिर्वहणं आप्तवाक्यानुसृतमिति लोके अनुभवसिद्धम्। अतः गुरोः तद्वाक्यस्य परमप्रामाणिकत्वात् आप्तवाक्यं परमप्रमाणं भवति। प्रमाणवाक्यानां आप्तोक्तित्वात् शास्त्रप्रमाणग्रन्थानामपि आप्तवाक्यत्वमेव।

## ५. व्यवहारात्

व्यवहारो नाम क्रिया, तद्वारा शब्दप्रयोगः अपि। अर्थात् प्रयोजककर्तृकेन गामानय इत्यादि शब्दप्रयोग उत चेष्टा वा व्यवहारत्वेन निर्णीतः। प्रयोजकेन निर्दिष्टः, प्रयोज्येन गोरानयनं व्यवहारः एव। 'हे ब्राह्मण पुत्रस्ते जातः, कन्या ते गर्भिणी' इत्यादिवाक्यश्रवणात् मुखे मोददर्शनं हासञ्च वाक्यार्थबोधावबोधेन संभवति। तेन शाब्दबोधोऽपि ज्ञायते।

गवानयने अनुमानमपि भाषापरिच्छेदे दृश्यते। यथा - "गवानयनक्रिया प्रयत्नपूर्विका विलक्षणक्रियात्वात् स्वीयक्रियावत्"[१५] इति। गवानयनप्रवृत्त्या शाब्दबोधमनुमानमेव। यथा गवानयनविषयप्रवृत्तिः गवानयनविषयकज्ञानजन्या तद्गोचरप्रवृत्तित्वात् इति। गवानयनगोचरः गामनय इति वाक्यजन्यः शक्तिग्रहः व्यवहारेण जायते। उक्तञ्च पदशक्तौ - 'एतादृशप्रयोज्यवृद्धसमवेतप्रयत्नसाध्यगवानयनक्रिया प्रयोजकवृद्धोच्चरितागामानयेति शब्दज्ञानजन्यशाब्दबोधरूपा'[१६] इति।

## ६. वाक्यशेषात्

प्रकरणे उत वाक्ये अवशिष्टपदादपि शब्दशक्तिग्रहः। 'यवमयश्चरु' इत्यत्र यवपदस्य दीर्घशूक इति धान्यविशेषे आर्याणां प्रयोगः। म्लेच्छानां प्रियङ्गुतण्डुले धान्ये। अत्र चरुरिति शब्दप्रयोगे दीर्घसूत्रे एव शक्तिग्रहः। कथमिति चेत् वाक्यशेषादेव अवगन्तुं शक्यतेति समाधानम्। उक्तञ्च -

'वसन्ते सर्वसस्यानां जायते पत्रशातनम्।

मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः।।'[१७]

एवं यवशब्दस्य बह्वर्थत्वात् प्रकृतानुसारेण व्याख्यानेनार्थावबोधने न वैषम्यम्।

## ७. विवृतेः

विवृतिः नाम विवरणम्। विवरणादपि शब्दशक्तिग्रहः संजायते। समानार्थकपदान्तरेण तदर्थकल्पनं विवरणम्। यथा घटोऽस्ति इत्यस्य कलशोऽस्तीति विवरणात् घटपदस्य कलशे शक्तिग्रहः। पचतीत्यत्र पाकं करोति इत्यर्थबोधनेन शब्दार्थबोधः। दृष्टान्तदार्ष्टान्तिकभावानां अभिप्रायेण शक्तिग्रहणार्थं पचतीत्यस्य पाकं करोतीति विवरणं, तस्मात् तदर्थबोधश्च।

## ८. सिद्धपदस्य सान्निध्यात्

असाधारणधर्मात्मकस्य अप्रसिद्धार्थवाचकपदस्य प्रसङ्गानुकूलतयागतैः पदैः सहोच्चरितत्वात् शब्दशक्तिग्रहः संजायते। दृष्टान्ततया न्यायसिद्धान्तमुक्तावल्यामुक्तम् - "सहकारतरौ मधुरं पिको रौति"[१८] इति। अत्र पिकपदस्य कोकिल इत्यर्थे शक्तिग्रहः। आम्रवृक्षे मधुरस्वनकर्ता पिकपदवाच्यः इत्यनेन वाक्येन शक्तिग्रहः। पिकपदस्य पूर्वं शक्तिग्रहाभावात् कोकिलदर्शनानन्तरं कोकिलः पिकशब्दवाच्य इति। एवं सहकारतर्ववच्छेद्यमधुराभिन्नशब्दानुकूलकृतिमान् पिक इत्यर्थबोधः।

एवं शक्तिग्रहोपायानां अष्टानां प्रामाण्येन शाब्दबोधस्य महत्सहकारित्वमस्तीत्यवगन्तुं शक्यते।

**पादसूची**

१. पातञ्जलमहाभाष्यम्
२. न्यायसूत्रम् - २.२.६८
३. न्यायसिद्धान्तमुक्तावलिः - पृ.११६
४. तत्रैव - पृ ११६
५. भाषापरिच्छेदः - पृ ११९
६. न्यायविचारः - पृ १३२
७. न्यायसूत्रम् - १.१.६
८. पदशक्तिः - पृ.३८
९. प्रबन्धावलिः - पृ.२१४
१०. तत्रैव - पृ. २१५
११. न्यायसूत्रम् - १.१.७
१२. न्यायसूत्रविवरणम् - १.१.७ पृ.२०
१३. तर्कसङ्ग्रहः - पृ.३४
१४. न्यायसिद्धान्तमुक्तावलिः - पृ.११८
१५. भाषापरिच्छेदः - पृ.२०१
१६. पदशक्तिः - पृ.३९
१७. प्रबन्धावलिः - पृ.४०, मुक्तावलिः - पृ.११७,
१८. मुक्तावलिः - पृ.११८

* * *